# पञ्चदशः पाठः

विश्ववाङ्मये वैदिक साहित्यस्य महत्त्वपूर्णं स्थानमस्ति। वैदिक साहित्ये चत्वारः वेदाः, तेषां व्याख्यारूपाः ब्राह्मणग्रन्थाः, आरण्यकग्रन्थाः, उपनिषदश्च सन्ति। तत्र अष्टोत्तर–एकशतानां (१०८) उपनिषदां परिगणनम् अस्ति। परन्तु प्रमुखाणां दश–उपनिषदां पठनं–पाठनं सर्वत्र एव भवति।

**ईश–केन–कठ–प्रश्न–मुण्ड–माण्डूक्य–तित्तिरिः।**
**ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं दश।।**

प्रस्तुतपाठः तैत्तिरीयोपनिषदः शीक्षा–वल्लीतः उद्धृतः अस्ति। विद्यासमाप्त्यनन्तरं छात्रस्य समावर्तन–संस्कारस्य अवसरे आचार्यः शिष्यं उपदिशति। तस्यैव वर्णनं 'शीक्षावल्ली' इत्यत्र अस्ति। अस्मिन् पाठे तस्यैव सारांशस्य उल्लेखः अस्ति।

## आचार्योपदेशः

**वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद! धर्मं चर। स्वाध्यायान्मा प्रमदः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्याय–प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव! पितृदेवो भव! आचार्यदेवो भव! अतिथिदेवो भव! यानि अनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यानि अस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि। श्रद्धया देयम्। अश्रद्धयादेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्।**

### पदच्छेदः

**वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति**– वेदम्+ अनूच्य+ आचार्यः+ अन्तेवासिनम्+ अनुशास्ति, **स्वाध्यायान्मा**– स्वाध्यायात्+ मा, **सत्यान्न**– सत्यात्+ न, **धर्मान्न**– धर्मात्+ न, **कुशलान्न**– कुशलात्+न, **अश्रद्धयादेयम्**– अश्रद्धया+ देयम्/अदेयम्, **एतदनुशासनम्**– एतत्+ अनुशासनम्, **एवमुपासितव्यम्**– एवम्+ उपासितव्यम्।

### कठिनशब्दार्थाः

**वेदम्**– ज्ञानराशिम्, **अनूच्य**– अध्याप्य, अध्यापनं कृत्वा (अनु+वच्+ल्यप्), **आचार्यः**– गुरुः, **अन्तेवासिनम्**– शिष्यम्, **अनुशास्ति**– उपदिशति, **चर**– आचरणं कुरु, **मा**– न, **प्रमदः**– प्रमादं कुरु, **प्रमदितव्यम्**– प्रमादं करणीयम्, **धर्मात्**– कर्त्तव्यकर्मणः, **कुशलात्**– आत्मरक्षणकर्मणः, **भूत्यै**– ऐश्वर्यकर्मणः,

**स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्**- नियमेन स्वाध्यायः प्रवचनं च अवश्यमेव करणीयम्, **मातृदेवः, पितृदेवः, आचार्यदेवः, अतिथिदेवः भव**- मात्रादयः देवाः यस्य स त्वं भव अर्थात् एते देवतावत्त्वया उपास्याः, **अनवद्यानि**- अनिन्दनीयानि अथवा प्रशंसनीयानि कर्माणि, (वदितुं योग्यं वद्यं, न वद्यम् अवद्यम्, न अवद्यम् इति अनवद्यम्, तानि), **सेवितव्यानि**- सेवनं करणीयम्, **सुचरितानि**- सुकर्माणि, **इतराणि**- अन्यानि, **श्रद्धया**- श्रद्धापूर्वकम्, **देयम्**- दातव्यम्, **अदेयम्**- कदापि न दातव्यम्, **ह्रिया**- मत्तुल्याः मदवराश्च अपि दास्यन्ति इति लज्जया वा देयम्, **भिया**- पारलौकिक-भयेन वा देयम्, **संविदा**- संवित् मित्रादिकार्यम् तया वा देयम्, **आदेशः** - विधिः, **एष उपदेशः** - पित्रादीनां पुत्रादिभ्यः एष एव उपदेशः, **एषा वेदोपनिषद्**- एतस्य वेदरहस्यार्थत्वात्, **अनुशासनम्**- ईश्वरवचनम् एतत् सर्वप्रमाणानाम् अनुशासनम्।

## अभ्यास-प्रश्नाः

**अतिलघूत्तरात्मक-प्रश्नाः**

१. रिक्त स्थानानि पूरयतु -

(१) श्रद्धया ..........। (२) अश्रद्धया ........।

(३) आचार्यदेवो .....। (४) स्वाध्याय-प्रवचनाभ्यां ......।

**लघूत्तरात्मक-प्रश्नाः**

१. श्रद्धया किं करणीयम्? २. धर्मात् किं न करणीयम्?

३. कीदृशानि कर्माणि सेवितव्यानि? ४. कानि त्वया उपास्यानि?

**निबन्धात्मक-प्रश्नाः**

१. केषु केषु कार्येषु कदापि प्रमादः न करणीयः?

२. दानस्य विषये शिक्षावल्यां यल्लिखितं तत् वर्ण्यताम्।

**व्याकरणात्मक-प्रश्नाः**

१. अधोलिखित पदेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुरुत-

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| उदा. | वद | वद् | लोट् | मध्यमः | एकवचनम् |
| | १. चर | ..... | ..... | ..... | ..... |
| | २. भव | ..... | ..... | ..... | ..... |
| | ३. गच्छ | ..... | ..... | ..... | ..... |
| | ४. जिघ्र | ..... | ..... | ..... | ..... |

२. निम्नलिखितेषु शब्द-लिङ्ग-विभक्ति-वचनानां निर्देशं कुरुत-

| | पदम् | शब्दः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| उदा. | स्वाध्यायात् | स्वाध्याय | पुल्लिङ्गः | पञ्चमी | एकवचनम् |
| | १. श्रद्धया | ..... | ..... | ..... | ..... |
| | २. धर्मात् | ..... | ..... | ..... | ..... |

| | | | | |
|---|---|---|---|---|
| ३. भिया | ..... | ..... | ..... | ..... |
| ४. ह्रिया | ..... | ..... | ..... | ..... |
| ५. सुचरितानि | ..... | ..... | ..... | ..... |
| ६. कर्माणि | ..... | ..... | ..... | ..... |

३. अधोलिखितेषु प्रत्ययस्य निर्देशं कुरुत–

| | | |
|---|---|---|
| उदा. | प्रमदितव्यम् | प्र+मद्+तव्यत् |
| १. | सेवितव्यानि | सेव्+ ............ |
| २. | देयम् | दा+ .............. |
| ३. | युक्तः | युज्+ ............ |
| ४. | वचनम् | वच्+ ............ |

४. निम्नाङ्कितेषु उपसर्गस्य निर्देशं कुरुत–

| | | |
|---|---|---|
| उदा. | प्रवचनम् | प्र+ वचनम् |
| १. | प्रमादः | .............. |
| २. | आदेशः | .............. |
| ३. | उपदेशः | .............. |
| ४. | सुचरितानि | .............. |
| ५. | अनुशासनम् | .............. |

५. अधोलिखितपदानां एकवचनं लिखत–

| | | |
|---|---|---|
| उदा. | सुचरितानि | सुचरितम् |
| | १. कर्माणि | .............. |
| | २. तानि | .............. |
| | ३. यानि | .............. |
| | ४. अनवद्यानि | .............. |
| | ५. लताः | .............. |
| | ६. नामानि | .............. |

६. क–खण्डं ख–खण्डेन सह योजयत–

| **क** | **ख** |
|---|---|
| सत्यं | भव |
| आचार्यदेवो | वद |
| धर्मं | न प्रमदितव्यम् |
| श्रिया | चर |
| कुशलात् | देयम् |